२६०७

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

२८०५

॥ ॐ ॥

श्रीस्तोत्रमञ्जरी

श्री लक्ष्मीधर-विद्यामन्दिर,
देवप्रयाग (गढ़वाल-हिमालय)
व्यवस्थापक-पं. चक्रधर जोशी

२६०७
५८३७
स्तोत्र
२५

कर्ता—

श्रीधनशम्शेर जङ्गबहादुर राणा

CC-0 Chakradhar Joshi and Sons, Nakshara Vedhshala Library, Dev Prayag. Digitized by eGangotri

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

मुद्रक—सहादुर राम
हितैषी प्रिंटिंग वर्क्स, नीचीबाग, बनारस सिटी ।

CC-0 Chakradhar Joshi and Sons, Nakshara Vedhshala Library, Dev Prayag. Digitized by eGangotri

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

॥ ॐ ॥

॥ अथ ॥

॥ श्रीरामाय नमः ॥

श्रीस्तोत्रमञ्जरी प्रारभ्यते

॥ आदि मङ्गलाचरणम् ॥

॥ श्रीगणेशाय नमः ॥

स्वर्गीयभोगास्पदलब्धवृत्तिषु
साध्याद्यसाध्यादिवियोगतन्तुषु ॥
आनन्दरूपेऽप्यनवस्थितं हि मे
मातस्त्वदाराधनलोलुपं मनः ॥ ० ॥

अथ श्रीरामलघुमहिम्न स्तोत्रम्

रामं सदानन्दमयं परेशम्
सच्चिन्मयं वाङ्मयदिव्यरूपम् ।
अग्निं नभस्थं युतनादबिन्दु-
बीजस्वरूपं सततं नमामि ॥ ० ॥

रमन्ते यस्मिन् ते मुनिवरगणाः सिद्धनिकरा-
यमानन्दाकारं सकलजगदाधारनिलयम् ॥
नमन्ति त्रैवर्गास्त्रिगुणमयतत्वादिकिरणम्
तमेव श्रीरामं स्मरहरनुतं नौमि सततम् ॥ १ ॥

CC-0 Chakradhar Joshi and Sons, Nakshara Vedhshala Library, Dev Prayag. Digitized by eGangotri

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

प्रकाशो राकारः प्रकृतिमयरूपो हरनुतो-
विमर्शश्चैवासौ विकृतिजतनुर्मात्तरपदः ॥
विसर्गाकारश्चिन्मयपरमसत्तात्मकतनुः
परं दिव्यं रामं स्मरहरनुतं नौमि सततम् ॥२॥
पुनः श्रीराकारो दहननिलयो रक्तवदनो-
मकारः शुद्धाभः शशधरतनुर्नित्यधवलः ॥
तयोर्योगाद्रामे-ति भवति महातारकमनु-
र्महारूपं रामं स्मरहरनुतं नौमि सततम् ॥३॥
जगन्माया दिव्या परमजननो रात्तरमयी
शिवो ब्रह्माकारः परमजनको मात्तरमयः ॥
उभौ तौ रामेती-ह जगति सदा संविलसतः
शिवाकारं रामं स्मरहरनुतं नौमि सततम् ॥४॥
महा रेफात्तेजो गगनमपि चाकारसुलिपेः
शतानन्दाज्जातञ्च सलिलमकाराद्वसुमती ॥
विसर्गाद्वायूरा म इति किल तत्त्वात्मकमनुः
सतत्वं श्रीरामं स्मरहरनुतं नौमि सततम् ॥५॥

CC-0 Chakradhar Joshi and Sons, Nakshara Vedhshala Library, Dev Prayag. Digitized by eGangotri

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

परो राकारोवै भुवनरचनाद्यङ्कुरमयो
मकारो ब्रह्माण्डोभवनिखिलबीजादिविभवः ॥
महामन्त्रो रामे-ति परतत्वबीजाङ्कुरमय-
स्तमादिं श्रीरामं स्मरहरनुतं नौमि सततम् ॥६॥

भुवां कुण्डल्याख्या भुजगसदृशी रात्तरमयी
मकाराद्वेलीनं नभसि शशिनो मण्डलमपि ॥
महायोगाद्या सा शुभहठमयो रामपदवो
सुयोगेशं रामं स्मरहरनुतं नौमि सततम् ॥७॥

ज्वलच्छ्रीराकारो निखिलजनसंपत्प्रदलिपि-
र्मकारः शीताद्यो निजसकलतत्वादिजनकः ॥
अभूच्छिह्नमद्रामेति पुनरधराम्नायजमनु-
र्महेशं श्रीरामं स्मरहरनुतं नौमि सततम् ॥८॥

परः सीरूपात्तः कहरिहर शक्त्यङ्गनिकरो
महोग्राख्याताराकृतिरपिचतारेतिपदवी ॥
ततोमौकाराद्यः खलु परमहेशावयवकः
शुभौसीतारामौ स्मरहरनुतौ नौमि सततम् ॥९॥

CC-0 Chakradhar Joshi and Sons, Nakshara Vedhshala Library, Dev Prayag. Digitized by eGangotri

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

स्वबीजं रामं ङेयुतमथ नियोज्यापिहृदयम्
भवेन्मन्त्रो दिव्यः परमसुखदः षड्लिपिमयः ॥
महाविद्यादाता यमभयहरः सर्वधनदः
षडर्णेशं रामं स्मरहरनुतं नौमि सततम् ॥१०॥
त्रपा तारान्त्यस्था तदनु हृदयाख्यं शुभपदम्
ततो रामो ङेन्त्यश्च परमशिवेशीप्रणवकः ॥
महासंपद्दाता भुवनविजयाष्टाक्षरमनुः
शुभाष्टार्णं रामं स्मरहरनुतं नौमि सततम् ॥११॥
महातारो माया तदनु कमला सा रतिपतिः
शुभा वाणी पश्चात् परमनिजबीजं मनुवरम् ॥
षडर्णोऽयं मन्त्रो भवति जपतामिष्टजनकः
सुबीजाख्यं रामं स्मरहरनुतं नौमि सततम् ॥१२॥
मनोज्ञं षट्कोणञ्च वसुदलयुग्मं शुभकरं
त्रिवृत्तं तद्बाह्येऽर्कदलकमलं षोडशदलम् ॥
ततो द्वात्रिंशत्कं तदनुधरणीचक्रहुतकम्
तदन्तस्थं रामं स्मरहरनुतं नौमि सततम् ॥१३॥

CC-0 Chakradhar Joshi and Sons, Nakshara Vedhshala Library, Dev Prayag. Digitized by eGangotri

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

स्ववामोरौ वामं स्वकरकमलं दक्षमपरम्
लसत्प्राज्ञा मुद्रं दधतमपि वीरासनगतम् ॥
घनश्यामं भ्राजन्मणिमुकुटमापीतवसनम्
ससीतं श्रीरामं स्मरहरनुतं नौमि सततम् ॥१४॥

इदं स्त्रोत्रं रामे-ति सुमनुसमुद्धारणयुतम्
पुनर्ध्यानोद्धारा-ति शुभकरयन्त्राख्यसहितम् ।
प्रसादार्थं राम-स्य ननु धनशम्शेररचितम्
क्षमार्थं श्रीरामं स्मरहरनुतं नौमि सततम् ॥१५॥

इति श्रीधनशम्शेर जङ्गवर्मणाविरचितं वीरेन्द्रकेसरिन्शर्मणा संशोधितं श्रीरामलघुमहिम्नस्तोत्रम् ॥ १ ॥

श्री लक्ष्मीधर-वि...
देवप्रयाग। (गढ़वाल-...
नक्षत्र-वेधशाला ... पं. चक्रधर जोशी
५८३७ स्तो. २५

॥ अथ ॥

॥ श्रीकृष्णकर्पूरस्तोत्रम् ॥

कर्पूरं पूररेफैर्विरहितमवनी वामनेत्रेन्दुभूषम्
कृष्णायेदं पदं यः प्रजपति सुजनष्ठद्वयं योजयित्वा ।
नानासौख्यादिभोगैः सह स विहरते दीर्घजीवी पृथिव्या-
मन्ते गोलोकवासो भवति हरिरसे लीनचित्तस्य तस्य ॥१॥

CC-0 Chakradhar Joshi and Sons, Nakshara Vedhshala Library, Dev Prayag. Digitized by eGangotri

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

ध्यायन्रूपं त्वदीयं हृदि विमलमुखं शान्तचित्तो जनो यो-
मन्दं मन्दं स्मरन् सन् तव सुमनुवरं पूर्णमर्थं विचार्य ॥
भोः कृष्ण त्वद्विलीनं निखिलजगदिदं भावयन् सुप्रहृष्टो-
जीवन्मुक्तः प्रशान्तः प्रभवति स नरो लोकपूज्यः सुरेश ॥ २ ॥

नादब्रह्माङ्कुरस्त्वं सुनिखिलजगदाधारबीजस्वरूपः
सिद्धानां सिद्धरूपः कुलजनहृदये चित्कलाकाररूपः ॥
कालस्यान्तस्वरूपः कलिकलुषमहाकालरूपस्त्वमेव
श्रीमद्योगेशवन्द्यस्त्वमसि मधुरिपुः पाहि मां दीनबन्धो ॥ ३ ॥

गोपीनां कामदेवो द्रुपदतनुजनुः कामधेनुस्वरूपो–
गोपालानां सखा त्वं विविधनृपनुतो वान्धवः पाण्डवानाम् ॥
नन्दस्यानन्ददाता सहचरवरदो राधिकाचित्तचौरो–
रत्नं त्वं यादवानां शिवसखकृपया रक्ष मां नाथहीनम् ॥ ४ ॥

विष्णुस्त्वं व्यापकत्वात्त्वमसि गिरिधरो गोशिखाधारणत्वात्
कृष्णः श्यामाङ्गकत्वाद्यदुकुलजननाद्वासुदेवस्त्वमेव ॥
पूर्णब्रह्मात्मकत्वात्त्वमसि हि निखिलानन्दरूपाच्युताख्यः
काली त्वं पुंस्वरूपा कुलजनवरदः कालसंकल्पनाच्च ॥ ५ ॥

CC-0 Chakradhar Joshi and Sons, Nakshara Vedhshala Library, Dev Prayag. Digitized by eGangotri

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

महामेघश्यामं मणिमुकुट पीताम्बरधरम्
सुवेणुं बाहुभ्यां दधतमतिशोभायुततनुम् ॥
हरे प्रत्यालीढासनपरिगतं त्वां स्मितमुखं
त्रिपञ्चारे पीठे स्मरति कुलजः कृष्णमतुलम् ॥६॥

दिवा श्रीकृष्ण त्वां यजति तुलसीपत्रकमलै-
र्जनो यो लक्षञ्च प्रजपति मनुं ते दृढ़मनाः ।
नरेन्द्रः संभूय प्रभवति स लक्ष्मीपतिरयम्
महावागीशानी निवसति च तत्कण्ठकुहरे ॥७॥

[१]लतागेहे स्थित्वा [२]नवनिधुवनान्तर्गतमना
यजन् त्वां रात्रौ श्रीरमण [३]कुलपुष्पैः [४]कुलधनैः ॥
[५]कुलस्थानं पश्यन् प्रजपति मनुं यः [६]कुलजनः
स जीवन्मुक्तः सन् विचरति शिवोऽक्षितितले ॥८॥

१लताः इडापिङ्गलासुषुम्णानाडीत्रयम् तस्य गेहं नाडीस्पन्दस्थानमाज्ञाचक्रम् ।

२नवनिधुवनं मूलाधारगतकुण्डल्याः सहस्रारस्थपरशिवेनसह संयोगस्थानम् ॥

३ कुलपुष्पानि मूलाधारगतकुण्डल्या सहस्रारगतचन्द्रमण्डले आधातात् निसृतलाक्षारसाभामृतविन्दवः ।

CC-0 Chakradhar Joshi and Sons, Nakshara Vedhshala Library, Dev Prayag. Digitized by eGangotri

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

महा जन्माष्टम्यां तव चरणयुग्मं मुनिपते
निशायामभ्यर्च्य प्रजपति सहस्राक्षरमनुम् ॥
हृदम्भोजे ध्यायन् तव ललितरूपं सपदियः
सदानन्दाकारः प्रभवति स मान्यः सुरसमः ॥९॥
समाराध्य प्राणेन्द्रियमपि [७]कुलाचारविधिना
वलिं कामक्रोधादिकपशुगणानां प्रतिदिनम् ॥
प्रयच्छेद्यस्तुभ्यं तवचरणपद्मार्पितमनाः
स एव ब्रह्मज्ञः स च परशिवः सैष सकलः ॥१०॥
अनन्त श्रीकृष्ण त्रिपुरहरवन्धो सुरनुत
त्वमेतद्ब्रह्माण्डं सृजसि मनसा रक्षसि हरे ।
पुनः स्वामिन् काले सकलमपि लीनं प्रकुरुषे ।
त्वमेवैको नान्यस्त्वमसि जगतां मुख्यनिलयः ॥११॥

---

४ कुलधनानि पञ्चप्राणाः

५ मूलाधारस्थकुण्डलया आरोहावरोहक्रम एव कुलाकुलक्रमः तस्य स्थानं मृणालतन्तुः ।

६ "कुलाकुलक्रमाभ्यासद्भवेत्कौलोवरानने" । इति बचनात् एवं कौलो भवति स एव कुलजनः अथवा कुलतः उच्यते ॥

७ कुलाचारविधि रेव कुलाकुलक्रमा भ्यासम् ।

CC-0 Chakradhar Joshi and Sons, Nakshara Vedhshala Library, Dev Prayag. Digitized by eGangotri

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

अभूमिस्त्वं भूमन् गुणविषययोर्वाङ्मनसयोः
कथं स्तोतुं शक्यो भवसि धनशम्शेरवचसा ।
तथापि त्वद्भक्तिर्मुखरयति मामत्र भवती
सपर्यापर्यायः प्रभवतु ततस्त्वत्स्तुतिरयम् ॥१२॥

इति श्रीधनशम्शेरजङ्गवर्मणाविरचितं वीरेन्द्रकेसरिन्शर्मणा संशोधितं श्रीकृष्णकर्पूरस्तोत्रम् ॥ २ ॥

॥ अथ ॥

॥ श्रीशिवकर्पूरस्तोत्रम् ॥

कर्पूरस्याद्यवर्णं तदनु गिरिपते षष्ठदीर्घं ह्युतस्ते ।
मन्त्रः साक्षात् षडर्णो भवति शुभकरः शत्रुविध्वंसकारी ॥
एतन्मन्त्रं सदा यो जपति निजगुरोः पादपद्मं स्मरन् सन्
पूज्यो भूत्वा सदैव प्रभवति स नरः श्रीयमोऽन्यो रिपूणाम्
भोः शम्भो सौष्मकान्ते वकरमसहिताकारयुक्ताम्बुतीक्ष्णैः
पञ्चार्णो मन्त्रराजो भवति शुभकरो मुक्तिदः शैवरूपः ।
तारान्ते ये जपन्तो-ह तवमनुवरं शुद्धभावैः प्रशान्ताः
ते ते सिद्धिं लभन्ते शिवरसमुदिता मुक्तरूपा मुनीन्द्राः २

CC-0 Chakradhar Joshi and Sons, Nakshara Vedhshala Library, Dev Prayag. Digitized by eGangotri

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

श्रीमत्प्रासादयुग्मं कृतपुटितमहापञ्चतारैर्महेश

त्वन्मन्त्रं शाम्भवाख्यं स्मरति यदि जनो वारमेकं जितात्मा ॥

भूत्वा पृथ्व्यां स लक्ष्मी-पतिरपि च महाकाव्यकालः कवीन्द्रः

पश्चान्निर्वाणमुक्तिं सुरनुतलभते पुण्यपापैर्विमुक्तः ॥ ३ ॥

शम्भो त्वां श्रीमहापा-शुपतमनुवरं संस्मरन् वाणलिङ्गे

सद्योजातादिवक्त्रार्चनमपि ललितापूजनं भालदेशे ॥

कुर्वञ्छ्रीयन्त्रपूजां [1]मममममहिलाभिर्नरो ब्रह्मरन्ध्रे

मात्त्राद्योगीन्द्ररूपः प्रभवति शिवतां याति सत्यं पृथिव्याम् ॥ ४ ॥

यस्त्वां ब्राह्मे मुहूर्त्ते यजति सह सदा क्षीररुद्राभिषेकैः

सद्यः सन्तोष्यदेवं ग्रहभयहरणं जायते तस्य शर्व ।

तैलाख्यैः शत्रुनाशं स्मरहरदुरितध्वंशनं गोपयोभिः

निर्वाणो मोक्षरूपः प्रभवति कुलजः [2]कौलरुद्राभिषेकैः ॥ ५ ॥

---

१ मननं । मन्त्रः । मौनं । मनः । (योग) मुद्रा । एवं पञ्चमकाराः एव मममममहिलाः ।

२ मूलाधारगतस्वयम्भूलिङ्गपरि कुलाकुलक्रमेण निसृतामृतधारा-भिषेकानि एव कौलरुद्राभिषेकानीत्युच्यते ।

CC-0 Chakradhar Joshi and Sons, Nakshara Vedhshala Library, Dev Prayag. Digitized by eGangotri

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

शिवं त्वां पञ्चाश्यं त्रिनयनयुतं शुद्धधवलं
चतुर्हस्तोपेतं सुपरशुमृगाभीतिवरदम् ॥
सदानन्दं व्याघ्राम्बरपरिदधानं स्मरहर
स्मरन्ति श्रीशैवास्त्रिवसुदलपीठोपरिगतम् ॥६॥
प्रदोषे भक्तोयो यजति तव पादाम्बुजयुगम्
सुपत्रैर्बिल्वैर्वा कुशुमसलिलैर्वा त्रिषवणम् ॥
प्रशान्तो दिव्यो वार्चयति शिवरात्रौ पशुपते
स एव ब्रह्मात्मा स हि भुवनसौख्यञ्चलभते ॥७॥
निशायां श्रीचक्रं यजति शिवलिङ्गोपरिसदा
तथा विन्दौ शैवं त्रिपुरहर निर्वाणपरमम् ॥
कुलद्रव्यैश्चाहङ्कृतिमथवलिं यः प्रकुरुते
परो हि यः कौलो व्रजति शिवतां भोः पशुपते ॥८॥
व्रती मूलाधारोपरि रसदलं दिग्दलमथो
परं हृत्पत्राख्यं परशिव महाषोडशदलम् ॥
त्रिवेण्यां हन्नाभ द्विदलकमलं ब्रह्मसदनम्
हठाभ्यांसंयोगाद्विलसति सुषुम्णाख्यपथगः ॥ ९ ॥

CC-0 Chakradhar Joshi and Sons, Nakshara Vedhshala Library, Dev Prayag. Digitized by eGangotri

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

सहस्रारेदीपाकृतिपरमलिङ्गं परशिवम्
सदा ध्यायन् दिव्यं समरसयुतं हंसगपरम् ॥
परान्तस्थं शुद्धं जपतियदिमन्त्रं कुलजन-
स्तदा जीवन्मुक्तः परमपदलीनः प्रभवति ॥१०॥
इदं स्तोत्रं सूक्ष्मं मनुवरसमुद्धारणजप-
स्वरूपाख्यंपूजा-परमशुभयोगादिसहितम् ॥
मया भक्त्या शम्भो तव परशिवाख्यं विरचितं
प्रसादार्थीतेऽहंगिरिश धनशम्शेरमनुजः ॥११॥

इति श्रीधनशम्शेर जङ्गवर्म्मणाविरचितं वीरेन्द्रकेसरिन्शर्म्मणा संशोधितं श्रीशिवकर्पूरस्तोत्रम् ॥३॥

॥ अथ ॥

॥ श्रीप्रणवाष्टकस्तोत्रम् ॥

अचतुराननमुस्वभुवं हरिं
महरमेव सुनादमहेश्वरम्
परममुज्वलबिन्दुसदाशिवम् ॥
प्रणवकारमहं प्रणमामितम् ॥ १ ॥

CC-0 Chakradhar Joshi and Sons, Nakshara Vedhshala Library, Dev Prayag. Digitized by eGangotri

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

अरचनाख्यकलामुपाकलां
मकृतिनाशकलां लयनादगाम् ॥
परमबिन्दुरनुग्रहगां कलां
प्रणवकारमहं प्रणमामितम् ॥ २ ॥
अगणनाथमुकारजनार्दनम्
मरविमेव सुनादपराम्बिकाम् ॥
परमबिन्दुशिवं परमेश्वरम्
प्रणवकारमहं प्रणमामि तम् ॥ ३ ॥
अपृथिवीमुजलं मकृशानुजम्
परमनादमयं परबिन्दुखम् ॥
भुवनबीजमहापरमेश्वरम्
प्रणवकारमहं प्रणमामितम् ॥४॥
अनिनदं क्षितिचक्रसमुद्भवम्
हृदयचक्रजमुध्वनिमुज्वलम् ॥
मखमेवसहस्रदले गतं
प्रणवकारमहं प्रणमामितम् ॥ ५ ॥

CC-0 Chakradhar Joshi and Sons, Nakshara Vedhshala Library, Dev Prayag. Digitized by eGangotri

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

पुनरमातृमयं तदुमानगम्
शुभममेयमयं त्रिगुणात्मकम् ॥
परमनादपरां परबैन्दवम्
प्रणवकारमहं प्रणमामितम् ॥ ६ ॥

त्रिपुरधाममयं परमात्मकम्
परमहंसमयं लयमोक्षदम् ॥
सुनिगमागमतत्वयुतं प्रभुं
प्रणवकारमहं प्रणमामितम् ॥ ७ ॥

ॐकारं परमात्मकं त्रिगुणकं चाम्बाम्बिकाम्बालिका-
रूपं नादमनादिशक्तिविभवाविद्यासुविद्यायुतम् ।
बिन्दुं ब्रह्ममय तदन्तरगतां श्रीसुन्दरीं चिन्मयीं
सा क्षाच्छ्रीप्रणवं परं च धनशंशेरः सदा नौम्यहम् ॥८॥

इति श्रीधनशम्शेर जङ्गवर्म्मणाविरचितं वीरेन्द्रकेसरिन्शर्म्मणा
संशोधितं श्रीप्रणवाष्टकस्तोत्रं ॥ ४ ॥

CC-0 Chakradhar Joshi and Sons, Nakshara Vedhshala Library, Dev Prayag. Digitized by eGangotri